— तृक्षयमाणः, — तरीतृक्ष्यमाणः ;

— तृक्षयिष्यमाणः, — तरीतृक्षिष्यमाणः ;

[1]तृट्-तृड्-तृक्षौ-तृक्षः ; [2]तृक्-तृग्-तृक्षौ-तृक्षः ; —

तृक्षितम्-[A]तः-तवान्, तृक्षितः, तितृक्षिषितः, तरीतृक्षितः-तवान् ;

तृक्षः, [3]तार्क्ष्यः, तृक्षः, तितृक्षिषुः, तरीतृक्षः ;

तृक्षितव्यम्, तृक्षयितव्यम्, तितृक्षिषितव्यम्, तरीतृक्षितव्यम् ;

तृक्षणीयम्, तृक्षणीयम्, तितृक्षिषणीयम्, तरीतृक्षणीयम् ;

तृक्ष्यम्, तृक्ष्यम्, तितृक्षिष्यम्, तरीतृक्ष्यम् ;

ईषत्तृक्षः-दुस्तृक्षः-सुतृक्षः ; — —

तृक्ष्यमाणः, तृक्ष्यमाणः, तितृक्षिष्यमाणः, तरीतृक्ष्यमाणः ;

तृक्षः, तृक्षः, तितृक्षिषः, तरीतृक्षः ;

तृक्षितुम्, तृक्षयितुम्, तितृक्षिषितुम्, तरीतृक्षितुम् ;

[4]तृक्षा, तृक्षणा, तितृक्षिषा, तरीतृक्षा ;

तृक्षणम्, तृक्षणम्, तितृक्षिषणम्, तरीतृक्षणम् ;

तृक्षित्वा, तृक्षयित्वा, तितृक्षिषित्वा, तरीतृक्षित्वा ;

प्रतृक्ष्य, प्रतृक्ष्य, प्रतितृक्षिष्य, प्रतरीतृक्ष्य ;

तृक्षम् २, तृक्षित्वा २, } तृक्षम् २, तृक्षयित्वा २, } तितृक्षिषम् २, तितृक्षिषित्वा २, } तरीतृक्षम् २ ; तरीतृक्षित्वा २. }

## (766) "तृणु अदने" (VIII-तनादिः-1468. सक. सेट्. उभ.)

तर्णकः-र्णिका, तर्णकः-र्णिकः, तितर्णिषकः-षिका, [5]तरीतृणकः-णिका ;

---

1. क्विपि, 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति ककारलोपे, जश्त्वे, चर्त्वविकल्पे च रूपम् ।

2. ण्यन्तात् क्विपि तु णिलोपस्य स्थानिवद्भावेन, 'स्कोः—' (8-2-29) इति ककारलोपो न भवति । 'संयोगान्तस्य—' (8-2-23) इति षकारलोपे, जश्त्वे च रूपमेवमिति ज्ञेयम् ।

3. पचाद्यचि, तृक्षस्यापत्यमित्यर्थे, 'गर्गादिभ्यो यञ्' (4-1-105) इति यञ्प्रत्यये रूपम् ।

4. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां भावादौ अकारप्रत्ययः ।

5. 'रीगृदुपधस्य च' (7-4-90) इति यङन्तेऽभ्यासस्य रीगागमः । अनुनासिकान्तत्वादत्राभ्यासस्य नुगागमो न शङ्क्यः; परत्वात् रीगागमेन तस्य बाधात् ।

A. 'उक्षन्नेनं मन्दहासेन रक्षन् विश्वं निक्षन् वल्लवीस्तृक्षिताघाः ॥' धा. का. 1.83.